# Vishnu Trimshopachara Pujanam 30 Parts

# વિષ્ણોસ્ત્રિંશોપચાર પૂજનમ્

## Document Information

Text title : Vishnu Puja with 30 parts

File name : viShNorstriMshopachArapUjana.itx

Category : vishhnu, pUjA, vishnu

Location : doc_vishhnu

Proofread by : Sunder Hattangadi

Latest update : August 5, 2019

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 2, 2024

*sanskritdocuments.org*

# વિષ્ણોસ્ત્રિંશોપચાર પૂજનમ્

૧ ધ્યાનમ્ –
સુરકદમ્બકૈઃ પ્રશ્રયેણ વૈ નિયતસેવિતં ગોકુલોત્સવમ્ ।
કિરીટકુણ્ડલં પીતજામ્બરં ખલનિષૂદનં ચિન્તયે વિભુમ્ ॥

૨ આવાહનમ્ –
ખગપવાહનં ક્ષીરજાપ્રિયં ભવભયાપહં ભુક્તિમુક્તિદમ્ ।
સુરપતિં જગન્નાથમીશ્વરં કમલભાસમા વાહયામ્યહમ્ ॥

૩ આસનમ્ –
વિધિમુખામરૈર્નમ્રમૂર્તિભિઃ પ્રણતસંશ્રિતં દુર્ધરાદિમત્ ।
વરમણિપ્રભા ભાસુરન્નવં જનપગૃહ્યતાં સ્વર્ણમાસનમ્ ॥

૪ પાદ્યમ્ –
કુસુમવાસિતં ગન્ધવિસ્તૃતં
    મુનિનિષેવિતં સાદરેણ વૈ ।
ધ્રુવપરાશરાભીષ્ટદ ! પ્રભો
    જનપગૃહ્યતાં પાદ્યમુત્તમમ્ ॥

૫ અર્ઘ્યમ્ ઃ-
કનકસમ્પુટે સ્થાપિતં વરં જલસુવર્ણમુક્તાફલૈર્યુતમ્ ।
કરસરોરુહાભ્યાં ધૃતમ્મયા જનપગૃહ્યતામર્ઘ્યમુત્તમમ્ ॥

૬ આચમનીયમ્ –
તવ રમાયુજઃ સેવનાજ્જના
    નૃપતિસન્નિભાઃ સમ્ભવન્તિ હિ ।
સુરતરઙ્ગિણી શુદ્ધવારિભિ-
    ર્જનપગૃહ્યતામાચમં શુભમ્ ॥

૭ સ્નાનમ્ –

હરિપદામ્બુજા નર્મદામહી સરયૂચન્દ્રભાગાભ્ય આહૃતમ્ ।
જલજવાસિતં સ્નાનહેતવે જનપગૃહ્યતામર્પિતઞ્જલમ્ ॥

૮ પયઃસ્નાનમ્ –
સુરગવુદ્ભભવં વીર્યવર્ધકં નિખિલદેહિનાં જીવનપ્રદમ્
શશધરપ્રભં ફેનસંયુતમ્ જનપગૃહ્યતામર્પિતં પયઃ ॥

૯ દધિ સ્નાનમ્ –
શુચિપયઃ સમુદ્ભૂતમુતપ્રદં
 વ્રજનિવાસિભિઃ સ્વાદિતં શુભમ્ ।
રજતસંનિભં શીતતામયં
 જનપગૃહ્યતામર્પિતન્દધિમ્ ॥

૧૦ ઘૃતસ્નાનમ્ –
હુતવહપ્રિયં ક્ષીરજોદ્ભવં સકલદેહિનાં સત્ત્વવર્ધકમ્ ।
કુમુદસદૃશં વિષ્ણુ દૈવતં જનપગૃહ્યતામર્પિતઙ્ઘૃતમ્ ॥

૧૧ મધુસ્નાનમ્ –
મધુલતોદ્ભવં સ્વાદુમઞ્જુલં મધુપમક્ષિકાદ્યૈર્વિનિર્મિતમ્ ।
મધુરતામયં ગન્ધસમ્પ્રદં મધુહતેઽર્પિતં ગૃહ્યતામ્મધુ ॥

૧૨ શર્કરા સ્નાનમ્ –
મદનકાર્મુકાદ્યા વિનિર્મિતા મધુરતાન્વિતા સર્વપાપહા ।
સરસતાઙ્ગતા તારકોપમા જનપગૃહ્યતાં શુદ્ધશર્કરા ॥

૧૩ ઉદ્વર્તન સ્નાનમ્ –
કદમ્બકેતકી પુષ્પસમ્ભવં
 મૃગમદાન્વિતં યન્ત્રનિર્મિતમ્ ।
જનુપકારિણા ભક્તિતો મયા
 જનપગૃહ્યતાં તૈલમર્પિતમ્ ॥

૧૪ શુદ્ધોદક સ્નાનમ્ –
હરિપદામ્બુજા નર્મદામહી
 સરયૂચન્દ્રભાગાભ્ય આહૃતમ્ ।
જલજવાસિતં સ્નાનહેતવે
 જનપગૃહ્યતામર્પિતઞ્જલમ્ ॥

૧૫ વસ્ત્રમ્ –
વિવિધતન્તુભિર્ગુમ્ફિતં નવં
    સુતપનીયભં સોત્તરીયકમ્ ।
મધુરિપો જગન્નાથ માધવ
    જનપગૃહ્યતાં વસ્ત્રમર્પિતમ્ ॥

૧૬ યજ્ઞોપવીતમ્ –
ત્રિગુણિતં સિતૈરર્કતન્તુભિઃ કૃતમિદમ્મયા શુદ્ધચેતસા ।
નિગમસમ્મતં બન્ધમોચકઃ જનપગૃહ્યતામુપવીતકમ્ ॥

૧૭ ગન્ધમ્-ચન્દનમ્ –
મલયસમ્ભવં પીતવર્ણકં મૃગમદાધિભિર્વાસિતં વરમ્ ।
મુક્તિષટ્પદં કુઙ્કુમાન્વિતં જનપગૃહ્યતાં ગન્ધમર્પિતમ્ ॥

૧૮ અક્ષતાન્ –
કમલસમ્ભવા મૌક્તિકોપમા
    સ્ત્રિપથગોદકૈઃ શાલિતાઃ શિવાઃ ।
અગરુકુઙ્કુમૈર્મિશ્રિતાવરા
    જનપગૃહ્યતામર્પિતાક્ષતાઃ ॥

૧૯ પુષ્પમાલા –
તરુણમલ્લિકા કુન્દમાલતી
    બકુલપઙ્કજાનાં સમુચ્ચયૈઃ ।
સતતસુત્રિતં ભક્તિતો મયા
    જનપગૃહ્યતાં હારમર્પિતમ્ ॥

૨૦ શ્વેત ચૂર્ણ –
કદમ્બકેતકી વૃક્ષસમ્ભવં વિવિધસૌખ્યદં કાન્તિવર્ધનમ્ ।
સિતકરોપમં સ્નેહસત્કૃતં જનપગૃહ્યતાં શ્વેતચૂર્ણકમ્ ॥

૨૧ રક્તચૂર્ણ ;–
અમરજાદિભિર્દેવવૃન્દકૈઃ શિરસિવૈધૃતં પ્રશ્રયેણ વા ।
તપનસદૃશં દૃષ્ટિમુત્કલં જનપગૃહ્યતાં રક્તચૂર્ણકમ્ ॥

૨૨ સિન્દૂર ચૂર્ણ –
ગણપતિપ્રિયં બાલસૂર્યભં
    પવનસૂનુના સ્વીકૃતં સદા ।

સુરભિવાસિતં સૂક્ષ્મચૂર્ણકં
  જનપગૃહ્યતાં નાગસમ્ભવમ્ ॥

૨૩ ધૂપમ્ –
અગરગુગ્ગુલા જ્યાદિમિશ્રિતં
  તપનયોગજોદ્ ભૂતસૌરભમ્ ।
અમરવૃન્દકૈઃ સ્નેહ સત્કૃતં
  જનપગૃહ્યતાં ધૂપમુત્તમમ્। ॥

૨૪ દીપમ્ –
અનલતૈલિની ગોઘૃતાન્વિતં તિમિરનાશકં દીપ્તતન્તુભિઃ ।
કનકભાજને સ્થાપિતમ્મયા જનપગૃહ્યતાં દીપમુત્તમમ્ ॥

૨૫ નૈવેદ્યમ્ –
પનસદાડિમામ્રાદિસત્ફલં
  સુઘૃતમોદકા પૂપપાયસમ્ ।
રજતભાજને સ્થાપિતમ્મયા
  જનપગૃહ્યતાં ખાદ્યમુત્તમમ્ ॥

૨૬ જળ-આચમની –
જલધિગોદ્ભવં શીતતામયં
  સકલપ્રાણિનાં પ્રાણદાયકમ્ ।
વિધિસમર્પિતં શુદ્ધચેતસા
  જનપગૃહ્યતામાચમમં શુભમ્ ॥

૨૭ મુખવાસ –(પૂગીફલં તામ્બૂલં) –
ખપુરસમ્ભવં પૂગચૂર્ણયુગ્
  મૃગમદેલુકા વાસિતં વરમ્ ।
ફણિલતાદલૈઃ ક્લૃપ્તબીડકં
  જનપગૃહ્યતામાસ્યભૂષણમ્ ॥

૨૮ દક્ષિણા –
નિખિલયાચિનાં શ્રેષ્ઠભોગદા
  નિગમસમ્મતા કર્મપૂર્ણદા ॥

સકલભૂજનૈર્વાઞ્છિતા સદા
  જનપગૃહ્યતાં હેમદક્ષિણા ॥

૨૯ નીરાજનમ્ –
હુતવહપ્રિયૈર્મિશ્રિતં વરં
    જલધિજૈર્યુતં સર્વપાપહમ્ ।
મુખવિલોકનાર્થાય સંસ્કૃતં
    જનપગૃહ્યતામાર્તિકં શુભમ્ ॥

૩૦ પ્રદક્ષિણામ્ –
વરદસઞ્ચિતં પૂર્વજન્મભિર્દહતિ કિલ્વિષં ત્વત્પ્રદક્ષિણા ।
નરહરિમુદા શુદ્ધચેતસા સતતમીશ્વરં ત્વાં નમામ્યહમ્ ॥

ઇતિ વિષ્ણોર્સ્ત્રિંશોપચારપૂજનં સમ્પૂર્ણમ્ ।

Proofread by Sunder Hattangadi

---

*Vishnu Trimshopachara Pujanam 30 Parts*
pdf was typeset on February 2, 2024

Please send corrections to *sanskrit@cheerful.com*